सं० ४८९४

नाम - ऊर्ध्वाम्नायः

कर्त्ता - ×

पत्रसंख्या - ३५ पत्राणि सं० ×

विषयः - तन्त्रम्

ऊर्ध्वाम्नायः

𑇔𑇘𑇙𑇔

4894

#F. 35
C

उद्यान्याय

[illegible]



ऊ०म्ना० ॥श्रीगणेशायनमः॥ ॥ईश्वरउवाच शृणुदेविप्रवक्ष्यामियत्मात्वंपरिपृच्छसि त
१ स्यश्रवणमात्रेणदेवतासुप्रसीदति १ कस्यचिन्नमयाख्यातमितः पूर्वंकुलेश्वरि
कथयामितवस्नेहानदूर्ध्वाम्नायंशृणुप्रिये २ वेदशास्त्रपुराणानिप्रकाश्यानिसुरे
श्वरि शैवाद्याश्चागमाः सर्वेरहस्याः परिकीर्त्तिताः ३ रहस्यातिरहस्यानिकुलशास्त्रा
णिपार्वति रहस्यातिरहस्यानांरहस्यमिदमंविके ४ ऊर्ध्वाम्नायार्थतत्वंहिपूर्णाहं
तात्मकंपरं सुगोपितंमयायत्नादिदानींतुप्रकाश्यते ५ ममपंचमुखेभ्यश्चपंचाम्ना
याःसमुद्गताः पूर्वश्चपश्चिमेचैवदक्षिणश्चोत्तरस्तथा ६ ऊर्ध्वाम्नायश्चपंचैतेमो ऊम०
क्षमार्गाः प्रकीर्त्तिताः आम्नायाबहवः संतिनोर्ध्वाम्नायेनतेसमाः ७ सत्यमेत १

द्गणोद्देनात्रकार्याविचारणा आम्नायावहवोगुप्ताश्चतुराम्नायभेदजाः ८ अस्मि
न्तंत्रेमयाख्याताः एवंतेकुलनायिके चतुराम्नायवेत्तारोवहवः संतिभामिनि ९
ऊर्द्ध्वाम्नायार्थतत्वज्ञाविरलाविरवंदिते यावंतः पांसवोभूमेस्तावंतिसमुदीरिताः १०
एकैकाम्नायजामंत्राभुक्तिमुक्तिफलप्रदाः उपमंत्राश्चतावंतः शावराःसमुदाहृताः
११ मयैवकथितास्तेपिलोकानुग्रहकांक्षया सर्वेषामपिमंत्राणांदेवतास्तत्फलप्रदा
१२ आवयोरंशसंभूतास्तेसमुद्दिष्टाः शुचिस्मिते सर्वमंत्रानहंवेद्मितान्योजानातिकश्च
न १३ मत्प्रसादेनयः कोपिवेत्तिमानवकोटिषु एकाम्नायंचयोवेत्तिसमुक्तोनात्रसंश
यः १४ किंपुनश्चतुराम्नायवेत्तासाक्षाच्छिवोभवेत् चतुराम्नायविज्ञानादूर्ध्वाम्नायः

ऊं० म्ना० परः प्रिये १५ तस्मात्तद्देवजातीयाद्यद्दिक्षेदात्मनोदितं ऊर्ध्वत्वात्सर्वधर्माणामूर्ध्वाम्ना
२ यः प्रशस्यते ऊर्ध्वं नयत्यधस्थं चेदूर्ध्वाम्नाय इतीरितः १६ ऊर्जितत्वात्कुलेशानिध्व
स्तसंसारसंकटात् ऊर्ध्वलोकैकसेवात्वादूर्ध्वाम्नाय इति स्मृतः १७ तस्माद्देवेशिजा
नोदितस्मान्मोक्षैकसाधनं सर्वाम्नायाधिकं पुण्यमूर्ध्वाम्नायं परात्परं १८ सर्वलो
केषु सर्वेषामहं श्रेष्ठो यथा प्रिये आम्नायेषु च सर्वेषु परऊर्ध्वाम्नायस्तथा प्रिये १९ देव
तानां यथा विष्णुर्ज्योतिषां भास्करो यथा अश्वमेधः क्रतूनां तु पापानां यथा मम प्रियः
२० यथा रसानां मधुरो लोहानां कांचनं यथा चतुष्पदां यथा धेनुर्यथा हंसस्तु पक्षिणां एम०
२१ आश्रमाणां यथा भिक्षुर्वर्णानां ब्राह्मणो यथा मनुष्याणां यथा राजा वयवानां २

यथा शिरः २२ आमोदानां तु कस्तूरी यथा कांचीपुरीषु च तथैव सर्वधर्माणाम् ऊर्ध्वाम्नायो
त धिकः प्रिये २३ नानाजन्मार्जितैः पुण्यकर्मफलोदयात् ऊर्ध्वाम्नायं विजानीयान्नान्य
यावीरवंदिते २४ न वेदैर्नागमैः शास्त्रैर्न पुराणैः सुविस्तरैः न यज्ञैर्न तपोभिर्वा न तीर्थ
व्रतकोटिभिः २५ नान्यैरुपायैर्देवेशि मंत्रौषधिपुरःसरैः आम्नायो ज्ञायते चोर्ध्वः श्रीम
द्गुरुमुखं विना २६ तमेवान्वेषयेत्तस्मात्सर्वसंज्ञकरुणानिधिः सर्वलक्षणसंपन्नम्
ऊर्ध्वाम्नायार्थकोविदं २७ तस्माद्देवि विजानीयादूर्ध्वाम्नायं कुलेश्वरि लभते कांक्षि
तां सिद्धिं सत्यं सत्यं वरानने ऊर्ध्वाम्नायं विजानाति यः सम्यक् श्रीगुरोर्मुखात् शास्त्र
मार्गेण स नरो जीवन्मुक्तो न संशयः ईदृशं चोर्ध्वाम्नायं वै यो जानाति द्विजः स वै तत्त्वतः सर्ववित्
गु स एव गुरुः साक्षात् स वै विज्ञः समांत्रिकः स सेव्यः स च मे भक्तः स यष्टव्यः स सात्विकः स

उ० म्ना० व्रतीसतपस्वीचसोनुष्ठातासपूजकः सवेदागमशास्त्रादिसर्वविद्याविशारदः सआचा
३ र्यःसचश्रीमानसपत्निःसचकौलिकः सयज्वासचपूतात्मासजापीसचसाधकः
सयोगीसकृतार्थस्सवीरःसचउत्तमः सपुण्यात्मासमसर्वज्ञःसमुक्तःसशिवःप्रिये
तत्कुलंपावनंदेविधन्यातज्जननीस्मृता तत्पिताचकृतार्थःस्यान्मुक्तास्तत्पितरस्तथा
पुण्यास्तद्देशजाःसर्वेपूतास्तन्मित्रबांधवाः बहुनेहकिमुक्तेनचोर्द्धाम्नायपरस्यच
स्मरणंकीर्त्तनंवापिदर्शनंवंदनंतथा संभाषणंचकुरुतेराजसूयाधिकंफलं सयत्र
वसतेदेवितत्रश्रीर्विजयोभवेत् अनामयंसुवृष्टिश्चसुभिक्षंनिरुपद्रवः तस्माद्गुरु
प्रसादेनचोर्ध्वाम्नायंनरोत्तमः योवेतितत्वोदेविसमेप्रियतमोभवेत् पूर्वाम्नायःसृ ऊ म०
ष्टिरूपःस्थिररूपश्चदक्षिणः संहारःपश्चिमोदेविउत्तरोनुग्रहोभवेत् मंत्रयोगंविदुःपू ३

वंभक्तियोगंतुदक्षिणं पश्चिमंकर्मयोगंतुज्ञानयोगंतथोत्तरं पूर्वाम्नायस्यसंकेतश्चतु
विंशतिरीरितः दक्षिणाम्नायसंकेतःपंचविंशतिरीरितःपश्चिम्नायसंकेतोद्वात्रिंशत्स
मुदाहृतः विंदुःषड्विंशदाम्नायःसंकेतःश्रीमदुत्तरे ऊर्ध्वाम्नायस्यचैतानिनसंतिकुल
नायिकेसाक्षाज्ज्ञानस्वरूपावानकिंचित्कर्मविद्यते ऊर्ध्वाम्नायस्यमाहात्म्यमितितेकथि
तंमया समासेनकुलेशानिमंत्रमाहात्म्यमुच्यते इतः पूर्वंमयानोक्तंयस्यकस्यापि
पार्वति तद्वदामितवस्नेहाच्छृणुमत्प्राणवल्लभे श्रीप्रसादपरामंत्रमूर्ध्वाम्नामधिष्ठितं
आवयोपरमाकारंयेवेत्तिसशिवःस्वयं शिवादिकृमिपर्यंतंप्राणिनांप्राणवर्त्मनां निः
श्वासोच्छासरूपेणमंत्रोयंवर्त्ततेप्रिये अनिलेनविनामेघोयथाकाशेनचेष्टते पराप्र
सादमंत्रेणविनालोकस्तथाप्रिये पराप्रासादमंत्रार्थस्यतमेतच्छृणुचरं अभिन्नंत

 लतोदेविदाताल्लतेयथानिलः वीजेंकुरस्तिलेतैलेमज्जावोऽस्थिरवौप्रभा चंद्रेज्योत्स्नान
 लः काष्टेपुष्पेगंधोजलेरसः शब्देचाथशिवेशक्तिः क्षीरेसर्पिःफलेरुचिः शर्करायांचमाधु
र्य्यंघनसारेराशीतले नियहानुग्रहोमंत्रेप्रतिमायांचदेवता दर्पणेप्रतिबिंबंचसमीरे
चलनंयथा पराप्रासादमंत्रोयंप्रपंचेपितथास्थितः वटबीजेयथावृक्षः सूक्ष्मरूपेणति
ष्टति पराप्रसादमंत्रेपिब्रह्मांडोपितथास्थितः सुपक्वेषुपदार्थेषुसरसेषुकुलेश्वरि न
वर्णोनविनास्वादुर्यथाभोक्तुर्नजायते पराप्रसादमंत्रेणायेमंत्रावानसंगताः तेफलं
नप्रयच्छंतिमंत्रशक्तिविवर्जिताः श्रीप्रसादपरामंत्रगोपनायकुलेश्वरि विचार्यादं
पुराणानिदर्शनाम्नायवेदजाः समवीक्ष्यंतयेमंत्राः शास्त्राणिविविधानिच भ्रमंति 
येषमूढास्तेतवमायाविमोहिताः जायंतेचम्रियंतेचसंसारक्लेशभाजनाः नलभं 

तेहि मोक्षं ते लत्प्रसादाविवर्जिताः मद्रूपे श्रीगुरौ यस्य दृढा भक्तिः प्रजापते पूर्वजन्मसहृ
स्त्रेषु शिवादिसमयोदितान् चतुराम्नायजान्मंत्रान्गुर्वनुज्ञां भविष्यति सपापकंचुको
न्मुक्तः शुद्धात्मा गुरुवत्सलः श्रीप्रासादावरं मंत्रं विजानाति न चान्यथा श्रीप्रासादपरामं
त्रं सज्ज्ञात्वा शुभमुच्यते सब्रह्मविष्णुरुद्राश्च शक्रादिः सुरपुंगवाः वसुरुद्रार्कदिक्पाल
मनुचंद्रादयः प्रिये मार्कंडेयादिमुनयो वशिष्ठादिमुनीश्वराः सनकाद्याश्च योगीशा जी
वन्मुक्ताः शुकादयः यक्षकिन्नरगंधर्वसिद्धविद्याधरादयः श्रीप्रासादपरामंत्रप्रसादा
द्वांछितं फलं प्राप्य मंत्रपरं नित्यं जपंत्यद्यापि पार्वति सामर्थ्यं पूज्यता विद्या तेजः
सौम्यमरोग्यता राज्यं स्वर्गं च मोक्षं च पराप्रासादजापिनः रुद्रेंद्रब्रह्मविष्णूनामपि
दुर्लभं तत्पदं सर्वधर्मविहीनोपि पराप्रासादमंत्रवित् सुखेन यां गतिं यान्ति तां स

उ० म्न०
५

वैंपिधार्मिकाः तस्यचिंतामणिमधेनुः कल्पतरुर्गृहे कुवेरः किंकिरः साक्षात्पराप्रासा
दजापिनः यथादिव्यरसस्पर्शाल्लोहोभवतिकांचनं पराप्रसादजापीचशुचिः पशुपति
स्तथा श्रीप्रासादपरामंत्रंयोजानातिद्विजस्ततः समांचतांचजानातिचावयोरपिसप्रि
यः पराप्रासादमंत्रज्ञः श्वपचोवापिपार्वति देवतास्थापनेशक्तः प्रतिमादिषुशंस
यः मंत्रमात्रेचयोवेत्तिपराप्रसादसंज्ञकंश्वपचोवापिमुच्येतकिंपुनस्तद्विधानवित्
5 पराप्रासादमंत्रज्ञोयत्करोतियदीच्छति यद्भुंक्तेतन्महेशानितपोध्यानंजपोभवेत्
दीक्षापूर्वंमहेशानिपारंपर्यसमन्वितं पराप्रासादमंत्रंयोवेत्तिसोसोवानसंशयः
चराचर-मेतानिभुवनानिचतुर्दश पराप्रासादमंत्रज्ञदेहेतिष्ठंतिपार्वति पराप्रासा राम०
दमंत्रज्ञोपत्रतिभामिनि दिव्यक्षेत्रंसमुद्दिष्टंसमंताद्दशयोजनं पराप्रसादमंत्रा ५

र्थं तत्वज्ञं कुलौलननायिके सुरासुराश्चवंद्यं ते किं पुनर्मानवादयः पराप्रासादमंत्रज्ञमतु
तिष्ठंति पार्वति देवक्षेत्रनदीयोगिमुनिदेवगणैः सह शैववैष्णवदौर्गार्कगाणपत्यं
दुस्तं भवान सर्वमंत्रान्स जानाति पराप्रासादमंत्रवित् श्रीप्रासादपरामंत्रो जिह्वाग्रे
यस्य वर्त्तते तस्य संदर्शनाद्देवश्वपचोपि विमुच्यते ब्राह्मणो वांत्यजो वापि शुचिर्वा
प्यशुचिः प्रिये पराप्रासादजापीयः समुक्तो नात्र संशयः गछतस्तिष्ठतो वापि जा
यतः स्वपतोपि वा पराप्रासादमंत्रोयं देवेशि नच निःफलः चिरेणैकेकफलदा मं
त्राः संति सहस्त्रशः कुलेशि मंत्रराजोयं शीघ्रं सर्वफलप्रदः पराप्रासादमंत्रोयं स
र्वमंत्रोत्तमोत्तमः जाग्रतोऽजाततो वापि भजतां कामदो मणिः शचींद्रौ रोहिणी
चंद्रौ स्वाहाग्नी वसुभा रवी लक्ष्मीनारायणौ चान्याधातारौ गिरिजाशिवौ अग्निसोमौ

उ०म्न० विंदुनादौदेविप्रकृतिपुरुषौ। आधाराधेयनाम्नोचभोगमोक्षौकुलेश्वरि प्राणापानौ
६ चशब्दार्थौप्रियेविधिनिषेधकौ सुखदुःखादियद्द्वंद्वंदृश्यतेश्रूयतेपिवा सर्वलोकेषुय
त्सर्वंमावामेवनसंशयः पुंस्त्रीरूपाणिसर्वाणिचावयोरंशजानिहि पराप्रासादमंत्रो
यंतत्स्वात्मकोभवेत अरूपंभावनागम्यंपरंब्रह्मकुलेश्वरि निष्कलंनिर्मलंनित्यंनि
र्गुणंव्योमसन्निभं अनंतमव्ययंतत्त्वंमनोवाचामगोचरं पराप्रासादमंत्रानुसंधा
6 नात्संप्रकाशते तस्मान्मंत्रमिदंदेविपराप्रासादसंज्ञकं परतत्त्वस्वरूपत्वात्सच्चिदान
दलक्षणात शिवशक्तिमयत्वाच्चभुक्तिप्रदानतः सकर्मापिचनिष्कर्मासगुणाचापिनि
र्गुणं श्रीप्रासादपरामंत्रंसर्वमंत्रशिखामणिं जपन्मुक्तिंचभुक्तिंचलभतेनात्रसंशयः ए०म्न०
बहुनात्रकिमुक्तेनसर्वसारंशृणुप्रिये श्रीप्रासादपरामंत्रसमोमंत्रोनविद्यते इद ६

मेवपरंज्ञानमिदमेवपरोजयः इदमेवपरंध्यानमिदमेवपरार्च्चनं इदमेवपरादीक्षाइद
मेवपरंजयः इदमेवपरंधर्ममिदमेवपरंव्रतं इदमेवपरोयज्ञइदमेवपरात्परं इदमेव
परंश्रेयइदमेवपरंफलं इदमेवपरंतत्वमिदमेवपरागतिः इदमेवपरंगुह्यंसत्यंस
त्यंनसंशयः इतिमत्वामनुवरंतत्निष्ठः स्यात्सदाप्रिये नास्तिगुर्वधिकंतत्वंनशिवा
धिकंदैवतं नहिवेदाधिकाविद्यानकुलाधिकदर्शनं नकुलाद्याधिकोज्ञानीज्ञानाद्धाना
धिकंसुखं नाष्टाष्टकाधिकाएजानरिमोक्षाधिकंफलं श्रीप्रासादपरामंत्रादधिकंनैव
विद्यते इदंसत्यमिदंसत्यमिदंसत्यनसंशयः श्रीप्रासादपरामंत्रमाहात्म्यमिहवर्णि
तुं नशक्नोमिवरारोहेकल्पकोटिशतैरपि गिरौसर्षपमात्रंनुसागरेचलुकांवुवत् त
याचमंत्रमात्म्यंकिंचितेकथितंमया ऊर्ध्वाम्नायस्यमाहात्म्यंश्रीप्रासादपरास्ततोः॥

उ०ल० श्रीईश्वरउवाच॥ ॥+ श्रीदेव्युवाच॥ ॥कुलेशश्रोतुमिछामिश्रीप्रासादपरात्मकं मंत्र
७ राजंवदेशानन्यासध्यानादिभिः सह॥ ॥+ शृणुदेविप्रवक्ष्यामियन्मांत्वंपरिपृछसि
तस्यश्रवणमात्रेणशि~ कारःप्रजायते इतःपूर्वंमयानोक्तंमंत्रायंयस्यकस्यचित
तवस्नेहाद्ददाम्यद्यशृणुत्वंप्राणवल्लभे अनंतंचंद्रभुवनविंदुविंदुयुगान्वितं श्रीप्रासाद
परामंत्रोभुक्तिमुक्तिफलप्रदः पराप्रासादमंत्रस्तु सादिरुक्तःकुलेश्वरि अनंतःहका
रःचंद्रः सकारःभुवनश्चौकारः विंदुरनुस्वारः विंदुयुगंविसर्गः एतैः सौः इतिवीजंसि हसौः
द्धं अयंप्रासादपरामंत्रः अयमेवमंत्रःसकारादिश्चेतपराप्रासादमंत्रोभवति त
थाप्रकाशानंदरूपत्वात्प्रत्यक्षफलदानतः प्रसन्नचित्तरूपत्वात्प्रसिद्धार्थनिरूपनात रा०म०
भक्तानाघप्रशमनात्प्रयत्नार्त्तिनिवारनात प्रसादकारणाद्धीयंप्रासादमनुरीरितः ७

परतत्वस्वरूपत्वात्सर्वसिद्धार्थनिरूपणात् परमानंदजननात्परमैश्वर्यकारणात् प
रोक्षफलदानाच्चपरधर्मनिदर्शनात् परत्वात्सर्वमंत्राणांपराणंमंत्रइतीरितः कुलमंत्र
मिदंदेवियासान्तश्रृणुवदामिते अथःप्रातःसमुत्थायगुरुंदेवात्मचिंतनं कृत्वास्वले
षुकृत्वाचकुर्याद्विरामसंप्रमोचनं सौचास्यशोधनंस्नानंसंध्यातर्पणचारित एकांतेद्वा
रयजनंविघ्नत्रयनिवारणं पूजास्थानंप्रवेशंचकुर्यात्समुपवेशनं देविपूजागृहेध्या
नंशिवादिगुरुवंदनं आसनंगणपक्षेत्रपालवंदनमीश्वरि पादुकास्मरणंकुर्याद्दीपना
थार्चनंप्रिये करांगशोधनंप्राणायामंसब्रह्मरंध्रकं दिग्बंधनंचांगयुग्मविधियुक्ताच
मातृका दशप्रकारसंताश्चलिपिःकमठसंज्ञकं षडीर्घमलबीजेनषडंगानिचपा
र्वति पंचब्रह्माणिचतथाचांगुलिन्याससमेवच आधारशक्तिमारभ्यपीठमंत्रांतमंवि

उ०म्ना० के अंतःषोढांकुले शांतिकुर्यात्सर्वोक्तवत्मता महाषोढाह्वयंन्यासंततः कुर्यात्समाहि
८ तः वक्ष्यमाणेनविधिनादेवताभावसिद्धये यस्यकस्यापिनैवोक्तंतवस्नेहाद्वदाम्यहं
प्रपंचोभुवनंमूर्त्तिर्मंत्रदैवतमातरः महाषोढाह्वयोन्यासः सर्वन्यासोत्तमोत्तमः ल
लिताविलासे ऋषिर्ब्रह्मासमुद्दिष्टोगायत्रीछंद ईरितं अर्द्धनारीश्वरोदेवोदेवतापरि
कीर्त्तितः ओकाराद्यैः स्वरैर्ह्रस्वैर्नपुंसकविवर्जितैः संयोज्यकरद्वितयंविन्यसेन्मूर्त्ति
8 पंचकं अंगुष्ठादिष्वंगुलीषुमूर्द्धास्यहृदयेषुच गुह्येपादद्वयेपंचवक्त्रस्थानेषुविन्य
सेत ईशानाख्यंतत्पुरुषमघोरंचतृतीयकं चतुर्थंवामदेवंचसद्योजातंचपंचमं
त्रितारांतेहसोंत्यहोमीशीनायनमस्ततः अंगुलीषुचमूर्द्धादिष्वेवंविन्यस्यदेशिकः एम०
ईशानायोर्ध्ववक्त्रायनमोमूर्द्ध्निविन्यसेत एवंतत्पुरुषायांतेपूर्ववक्त्रायहृन्मुखे ८

दक्षकर्णे नवामे च चूडाधश्च प्रविन्यसेत् दक्षिणां चोत्तरं वक्त्रं पश्चिमं शिष्टमूर्तिभिः इति
अंगप्रविन्यस्य वक्ष्यमाणांस्मरन् शिवं महाषोढाह्वयन्यासं ततः कुर्यात्समाहितः तत्रा
दौ परमेशानि प्रपंचन्यास उच्यते प्रपंचद्वीपजलधिगिरिपत्तनपीठकाः ॥ क्षेत्रं वानाश्र
मगुहानदीचत्वरकोद्भिजाः स्वेदजांडजराष्टजाइत्युक्ताद्रिचषोडश श्रीर्न्दीयाकमला
विष्णुवल्लभापद्मधारिणी समुद्रतनयालोकमाताकमलवासिनी इंदिरामारमापद्मत
थानारायणप्रिया सिद्धलक्ष्मीराज्यलक्ष्मीर्महालक्ष्मीरितीरिताः शक्त्रूपः स्युः प्रपं
चानां स्वराणामधिदेवताः लवस्त्रुटिः कलाकाष्ठानिमेषः श्वासएव च घटिकाश्च मु
हूर्तश्च प्रहरो दिनएव च संध्या रात्रिस्तिथिश्चैव वारो नक्षत्रमेव च योगश्च करणं
पक्षो मासो राशिर्ऋतुस्तथा अयनं वत्सरयुगं प्रलयाः पंचविंशतिः आयोमां चंडि

उ०म्ना० काद्दुर्गाशिवापर्णाम्बिकासती ईश्वरीशांभवीशानोपार्वतीसर्वमंगला दाक्षायणीहै
२ मवतीमहामायामहेश्वरी मृडानीचैवरुद्राणीसर्वाणीपरमेश्वरी कालीकात्यायनी
गौरीभवानीतिसमीरिताः शक्तयस्स्युर्लवादीनांस्पर्शानामधिदेवताः पंचभूतात्स्वत
न्मात्राः कर्मज्ञानेंद्रियानिलाः गुणांतःकरणावस्थाधातुदोषादशेरिताः ब्राह्मीवा
गीश्वरीवाणीसावित्रीचसरस्वती गायत्रीवाक्प्रदापश्चाच्छारदाभारतीप्रिये विद्यात्मि
9 कापंचभूतव्यापकानामधीश्वराः त्रितारामूलविद्यांतेमातृकास्सरतःपरं वदेत्सपंच
रूपायैश्रियैनमइतिक्रमात् प्रपंचादिभिरामोज्यवर्णाशक्तिर्नियोजयेत् मातृका
न्याससंप्रोक्तस्थानेषुपरमेश्वरि त्रितारमूलसकलप्रपंचस्यात्स्वरूपतः आद्येपरांबा एम्न०
देव्यैनमउक्त्वाव्यापकंन्यासेत् प्रपंचन्याससर्वस्याद्भुवनन्यासउच्यते त्रितारमूल २

विद्यांते ऋं ऋा मिमतलं वदेत् लोकं च निलयं चैव शतकोटिपदं ततः । गत्वा ह्यो योगिनी
म्लं देवतां तेयुतं प्रिये वदेदाधारशक्त्यां वादेव्यै स्त्यादयो न्यसेत् ईं म्लं म्लं वितलं गुल्ब
लोकं चानंतसंज्ञकं शेषं च पूर्ववत्प्रोक्ता गुल्फयोर्विन्यसेत्प्रिये ऌं ॡं लं सुतलं वापि गु
ल्फं चाचिंत्यसंज्ञिकं शेषं च पूर्ववत्प्रोक्ता जंघयोर्विन्यसेत्प्रिये ल्हं मे मैं महातलं च मह
गल्बं स्वतंत्रकं शेषं च पूर्ववत्प्रोक्ता देविजान्वोम्र विन्यसेत् ओं मों तलातलं परमगुल्बवो
ल्काविधानकं शेषं च पूर्ववत्प्रोक्ता चोर्वोर्देवेशि विन्यसेत् अं मों रसातलं चैव रहस्यं ज्ञा
नसंज्ञकं शेषं च पूर्ववत्प्रोक्ता स्का गुह्यदेशे न्यसेत्प्रिये कवर्गमपि पातालं मरहस्यं च त
त्क्रिया ॥ शेषं च पूर्ववत्प्रोक्ता म्लाधारे न्यसेत्प्रिये चवर्गं म्रतिरहस्यं च श्रीडाकिनीम
पि शेषं च पूर्ववत्प्रोक्ता स्वाधिष्ठाने न्यसेत्प्रिये टवर्गं म्स्वमहोरहस्यं राकिनीमपि शेषं

उ०म्न० चपूर्ववत्प्रोक्तानाभिदेशेन्यसेत्प्रिये तवर्गस्वच्छपरमरहस्यंलाकिनीमपि शेषंचपूर्व
१० वत्प्रोक्तात्हृदयेविन्यसेत्प्रिये पवर्गंचमहागुप्तंकाकिनीमपिचक्रमात्शेषंचपूर्ववत्प्रो
क्ताकंदेदशेन्यसेत्प्रिये यवर्गंचजनोगुप्ततरश्चासाकिनीमपि शेषंचपूर्ववत्प्रोक्ताचा
ज्ञायांविन्यसेत्प्रिये शवर्गंचतपश्चापिगुप्तंश्रीहाकिनीमपि शेषंचपूर्ववत्प्रोक्तांललाटे
विन्यसेत्प्रिये लंक्षंसत्यमहद्गुप्तंयाकिनीमपिचप्रिये शेषंचपूर्ववत्प्रोक्तांब्रह्मरंध्रे
10 न्यसेत्सुधीः त्रितारमूलमंत्रांतेचतुर्दशभुवंवदेत् नाधिपायैश्रीपरांबादेव्यैत्वह्याप
कंन्यसेत् कृत्वैवंभुवनन्यासंमूर्तिन्यासमथाचरेत् केशवनारायणमाधवमाधवगो
विंदविष्णवः मधुसूदनसंज्ञश्चस्यात्त्रिविक्रमवामनौ श्रीधरश्चहृषीकेशः पद्मना ए म० १०
भोदामोदरः वासुदेवःसंकर्षणः प्रद्युम्नश्चानिरुद्धकः अक्षराद्येष्टदेशानाउग्रीर्धन

यनस्तथा अहिश्चलपिणीलुमाल्लतदोषैकनायिका ऐकारिणीचोद्यतीचोर्वकाचांजन
प्रभा अस्थिमालाधराचेतिसंप्रोक्ताः सरदेवताः भवः शर्वोथरुद्रः पशुपतिश्चोयएवच
महादेवस्तथाभीमईशस्तत्पुरुषाह्वयः अघोरः सद्योजातश्चवामदेवइतीरिताः करभद्रा
खलवल्लागरिमादिफलप्रदा घोरपादांपंक्तिनासातथाचंद्रार्द्धधारिणी छंदोमयीजगत्स्था
नाकुंकृतिश्चजतःपरा ज्ञानदाचततष्टकठकृधराठंकृतिश्चडामरी कभादीनांठडांतानां
वर्णानांदेवतास्त्विमाः ब्रह्माप्रजापतिर्वेधापरमेष्ठीपितामहः विधाताथविरिञ्चिश्च
स्त्रष्टाचचतुराननः हिरण्यगर्भइत्युक्ताः क्रमाद्रुहमादयोदश यक्षिणीरंजनीलक्ष्मी
वज्रिणीशशिधारिणी षडाधारलयासर्वनायिकाहसितानना: ललिताचक्षमाचे
तिप्रोक्तायाद्यार्णदेवताः त्रितारमूलमंत्रांतेस्मारणविमूलनसशक्तिकान चतुर्थ्यांतम

सायुक्तान्मस्तकेचाननेन्यसेत् संस्कंधपार्श्वकमूरजानुजंघापदेषुच दक्षादिवामपर्यं
११ तंविन्यसेत्परमेश्वरि कभाद्यर्णायुतात्मंत्रात्भवानीशक्तिसंयुतान् पादपार्श्वबाहुकंठ
पंचवक्त्रेषुविन्यसेत् दक्षाधारेषुब्रह्मादिर्यादिशक्तियुतान्न्यसेत् त्रितारमूलमंत्रांतेश्री
मत्त्र्यम्बिकाततः आद्यायैपरांवादंवौनमउक्त्वाव्यापकंन्यसेत् मूर्तिन्यासंविधायेत्थंमं
त्रन्यासमथाचरेत् त्रितारमूलमंत्रांड्एकलक्षंचकोटिच।भेदस्थप्रणवाद्येकाराते
त्मा।खिलमंत्रतः ततोधिदेवतायैस्यात्सकलंचफलप्रदं आद्यैतथैककूटेश्वर्यम्बोद
व्यैनमोवदेत् ईमुमूंचद्विलक्षादिहंसादिपूर्ववत्परं ऋंॠंलृंलॄंचत्रिलक्षादित्रिकूटंपू
र्ववत्परं ल्हमेमैंचचतुर्लक्षंचंद्रादिपूर्ववत्परं ओमोमंमःपंचलक्षंसूर्यादिपूर्वव एम०
त्परं कंखंगंचेवषड्लक्षंस्कंदादिपूर्ववत्परं चंडंवेसप्तलक्षंगणेशादिपूर्ववत्परं छंजं ११

ष्ठमष्टलक्षंवटुकादिपूर्ववत्परं धंनंयद्वादशलक्षंवाएयादिंपूर्ववत्परं फंवंमंत्रयोदश+
जंठंठंनवलक्षंचक्रमलादिपूर्ववत्परं॥ डठरांदशलक्षादिविद्यादिंपूर्ववत्परं तंथंदमेकाद
शलक्षंशैपादिंपूर्ववत्परं+ लक्षंलक्ष्म्यादिंपूर्ववत्परं मंयंरंचचतुर्दशलक्षंगोर्यादिंपूर्व
वत्परं लंवंशंपंचदशलक्षंदुर्गादिंपूर्ववत्परं पाद्यर्शांषोडशलक्षंत्रैपुरादिंचषोडश क्ष
रात्माखिलमंत्राधिदेवतात्मकलंभवेत् तथाफलप्रदायैषोडशकूटेश्वरीयुतः श्रीवा
देव्यैनमः प्रोक्तोमंत्रन्यासोमहेश्वरि आधारलिंगयोर्नाभिहृत्कंठास्यादिक्षकश्रूतो
निरोधिकायामर्द्धेंदौविंदौचैककेलापदे उन्मादिषुवक्त्रेषुनादानादांतयोरपि ध्रुव
मंडलदेशेचविन्यसेत्कुलनायिके त्रितारम्लमंत्रांतेसर्वमंत्रात्मिकापदं श्रायैपरां
बादेव्यैवत्हृदयेव्यापकंन्यसेत् मंत्रन्यासंविधायेत्थंदेवतन्यासमाचरेत् त्रितारम्ल

उ० म्म०
१२
12

लमंत्रांतेअंआंसप्तकोटिच योगिकुलशब्दांतेसवितायैपरंवदेत् विधिनिवृत्तंवाद
व्यैनमइत्युच्चारेत्प्रियै इदंयोगिप्रतिमांचशेषंपूर्ववपदुच्चरेत् उऊंतपश्चिविद्यांचशेषं
पूर्ववदुच्चरेत् अंअःशांतंतथाशांतिशेषंपूर्ववदुच्चरेत् ल्टंलृंमुनिशांत्यतीताशेषंएऐ
देवंतुलहलेखांशेषं ओऔराक्षसशब्दांतेगगनांपूर्ववदुच्चरेत् अमरविद्याधरंरक्तांशेषं
कंखंसिद्धमहाच्छुष्मांशेषंगंघंसाध्यंकरालींचशेषंङं चंतथाप्सरजपाशेषंछंजंगंध
र्वांविजयांशेषं झंञंगुह्यकशब्दांतेअजितांपूर्ववत्स्मरां टंठंपक्षापराजिताशेषंडंढं
किन्नरवामांचशेषंणंतंचपन्नगज्येष्ठांशेषं थंदंगरोश्ममायाचशेषं पंफंभैरवश
ब्दांतेकुंडलीपूर्ववत्स्मरेंवंभंवटुककालीचशेषं मंयंसेत्रेशशब्दांतेकालरात्रिंचपूर्वव राम०
त् रंलंप्रथमभगवतीशेषंऽ वंशंब्रह्माचसर्वेशीशेषंसंविष्णुंचसर्वज्ञांचशेषं हं १२

लंरुद्रंसर्वकर्त्तारिशेषं मंयंक्षेत्रेशशब्दांतेकालरात्रिंचपूर्ववत् खेचरांचरशक्तिंचशेषंपू:
श्रंयंष्टगुल्फजंघाचजानूरुकटिपार्श्वयोः स्तनकक्षकरस्कंधकर्णांमूर्द्धिचरंधके रक्ष
भोगादिवामांतंविन्यसेत्कुलनायिके त्रितारमूलमंत्रांतेसर्वदेवात्मिकाततः श्रायै
परांवाग्देव्यैचसहस्येनतुव्यापकं देवन्यासंविधायेत्थंमातृकान्यासमाचरेत् त्रितार
मूलमंत्रांतेवर्गानंतुकोटिभूः चरीकुलंचसहितायैश्रांक्षांसंगलापरं श्रंवाग्देव्यैततो
न्यादांक्षांब्रह्माणीतः परंश्रंवाग्देव्यैततोनंतकोटिभूतकुलेनवदेत् संहितायेचश्रंसं
मंगलनाथायश्रंवदेत् क्षचामितांचभैरवनाथायनमउच्चरेत् चवर्गंखेचरीमीलां
चर्चिकांचमहेश्वरीं वेतालमिलिचर्चिकंचरुरुंशेषंचपूर्ववत् ठवर्गेपातालचरींमू
हांयोगेश्वरींवदेत् कौमारींपिशाचंडंडवरं गेशचंडकौ तवर्गेदिक्करीरिंसाहरसिद्धा

वावैस्मंवी अपस्मोरं रिं संहारसिद्धक्रोधादिरूर्वेवत पवर्गे स्तद्वचरीं ल्हंषां मर्दिनीवाराह
१२ तःपरं स्याब्रह्मराक्षसंत्संषं मधुन्मत्तादिरूर्वेवत पवर्गः स्याद्विरिचरीं ऐं शाकिलिकिले
तिच इंद्राणीचेटकंअंशं किलिकिलश्चकपालिकः शवर्गः स्याद्वनचरी औं शंकलादि
रात्रिच चासुंप्रेतश्रों वंचकालरात्रिश्चभीषणाः लंक्षंजलचरीश्चाः लांभवेत्यश्चाच
भीषणा महालक्ष्मीश्चकूष्माण्डअंलंपश्चाच्चभीषणाः संहारभैरवश्चांतिशेषंरूर्वेव
13 डश्चरेत मूलारेलिंगनाभ्येनाहृतविशुद्धिषु आज्ञाभालतलब्रह्मरंध्रेष्वेवं प्रविन्यसे
त त्रितारमूलमंत्रांते मातृकामातृभैरव अधिपापैपरां वार्देव्यै नमोस्त्वा व्यापकं
न्यसेत मातृन्यासं कुलेशानि कुर्यादेवं समाहितः एवन्यस्ततनुर्हर्दि विध्यायेद्देवमन राम.
न्यधीः अमृतार्णवमध्यास्थ स्वर्णद्वीपेमनोरमे कल्पवृक्षवनांतेः स्थितवमानिक्य १३

मंडपो नवरत्नमये श्रीमत्सिंहासनगतांबुजे त्रिकोणांतःसमासीनं चंद्रसूर्यशतप्र
भं अर्द्धांबिकासमायुक्तं प्रविभक्तविभूषणं कोटिकंदर्पलावण्यं सदाषोडशवार्षिकं मं
दस्मितमुखांभोजं त्रिनेत्रं चंद्रशेखरं दिव्यांबरस्रगालेपं दिव्याभरणभूषितं पानपा
त्रं च चिन्मुद्रां त्रिशूलं पुस्तकं करैः विद्यासंसदि विभ्राणं सदानंदमुखेक्षणं महाषो
ढोदिताशेषदेवतागणसेवितं एवं चित्तांबुजे ध्यायेदर्धनारीश्वरं विभुं पुंरूपं वा स्मरे
द्देवि स्त्रीरूपं वा विचिंतयेत् अथवा निष्कलं ध्यायेत्सच्चिदानंदलक्षणं सर्वं तेजोमयं ध्या
येत्सचराचरविग्रहं ततः संदर्शयेन्मुद्रादशकं परमेश्वरि योनिं लिंगं च सुरभिं देति मुद्रा
चतुष्टं वनमालां महामुद्रां नमोमुद्रामपि क्रमात् यथाशक्ति जपेन्मूलमंत्रं श्रीपादुका
मपि मूर्द्धि संचिंतयेद्देवं श्रीगुरुं शिवरूपिणं सहस्रदलपंकजे सकलशीतरश्मिप्र

उ० म्ना० भं वराभयकरांबुजंविमलगंधपुष्पांबरं प्रसन्नवदनेक्षणांसकलदेवतारूपिणींस्मरे
१४ च्छिरसिसततंतदभिधानपूर्वंगुरुं एवंन्यासेकृतेदेविसाक्षात्परशिवोभवेत् मंत्रीन
चात्रसंदेहोनिग्रहानुग्रहक्षमः महाषोढाह्वयंन्यासंयः करोतिदिनेदिने देवाःसर्वे
नमस्यंतितंनमामितसंशयः महाषोढाह्वयंन्यासंयःकरोतिहिपार्वति· दिव्यसेत्रं
समुद्दिष्टंसमंतादशयोजनं कृत्वान्यासमिदंदेवियत्रतिष्ठतिमानवः तत्रस्यादि
14 जयोलाभःसमान्यःपुरुषःप्रिये महाषोढाकृतन्यासंतदज्ञंवंदतेयदि मासान्मृत्यु
मवाप्नोतियदिज्ञातांशिवःस्वयं दिव्यंतरिक्षभूशैलजलारन्यनिवासिनः उद्दंडभूत
वेतालदेवरक्षोयक्षादयः देवाःसर्वेपिकुर्वंति ऋषियोगीमुनुश्वराः बहुनोक्तेनकिंदे राम०
विन्यासमेनंममप्रिये नापुत्रायवदेद्देविनाशिष्यायप्रकाशयेत् आज्ञासिद्धिमवा १४

ग्नोतिरस्मिन्यासमाचरेत् अस्मात्परतरात्स्यादेवताभावसिद्धये लोकेनास्तिनसंदे॥
ः तत्संसत्यंवरानने ऊर्ध्वाम्नायप्रवेशश्चपराप्रासादचिंतनं महाषोढापरिज्ञानंन
चाल्पतपसःफलं दिव्यौघेचादिनाथश्चतच्छक्तिश्चसदाशिवः तत्पत्नीचेश्वरस्तस्य
भार्यारुद्रश्चतद्वधः विष्णुश्चतत्प्रियाब्रह्मातकांताद्वादशोरिताः दिव्यौघेसनकश्चै
वसनंदनसनातनौ सनत्कुमारश्चसनत्सुजातश्चऋभुक्षजः दत्तात्रेयोरैवतकोवा
मदेवस्ततःपरं ततोव्यासःशुकश्चापिएकादशसमीरिताः मानवौघेनरसिंहश्चम
हेशोभास्करस्तथा महेन्द्रोमाधवोविष्णुःषडेतेपरिकीर्त्तिताः नामांतेयोजयेद्देविदि
व्यौघैःपरमंशिवं महाशिवंचसिद्धौघेमानवौघेसदाशिवं देवतांपुरतोदेविगुरुपंक्ति
प्रपूजयेत् पंक्तित्रयंक्रमेणाथध्यात्वासम्यगनन्यधीः षोडशैरुपचारैस्तुसांगं

उं॰ म्ना॰ सावरणं शिवं पूजयेन्मूलमंत्रेण गंधपुष्पाक्षतादिभिः महाघोराश्रितान्शेषपरिवा
१५ राश्च शांभवि प्रणवादिनमोंतेन तत्तन्नाम्ना समर्चयेत् वटुमंत्रं प्रवक्ष्यामि शृणुष्व
कुलनायिके तारात्रयं ततो देवीपुत्रायावटुकेति च नाथः स्यात्कपिलजटाभारभा
सुरपिंगल त्रिनेत्रेपि पदं पश्चाज्ज्वालामुखपदं ततः इमां पूजां बलिं गृह्ण युगपा
15
वकवल्लभा उक्तो वटुमनुश्चतुश्चत्वारिंशद्भिरक्षरैः बलिदानेन संतुष्टो वटुकः सर्व
सिद्धिदः शांतिं करोतु मे नित्यं भूतवेतालसेवितः तारत्रयं ततः सर्वयोगिनीभ्यः
पदं भवेत् पश्चात्तु सर्वभूतेभ्यः सर्वभूतादि वर्णि च वंदिभ्यो डाकिनीभ्यश्च शाकिनी
भ्यस्ततः परं त्रैलोक्येति पदं चैव वासिनीभ्य इमां वदेत् पूजां बलिं गृह्ण युगं स्वाहां एम॰
तो योगिनीमनुः कथितोयं कुलेशानि एकपंचाशदक्षरः यो काचिद्योगिनी घोरसौ १५

भ्याघोरतरापरा खेचरीभूचरीव्योमचरीप्रीतास्तमेसदा तारात्रयंवदेत्सर्वभूतेभ्यः
सर्वएवच पश्चाद्भूतपतिभ्योसद्युक्तः सप्तदशाक्षरः भूतायेविविधाकारादिव्याभौमां
तरिक्षगाः पातालतलसंस्थाश्चशिवयोगेनभाविताः ध्रुवाद्याः सत्यसंधाश्चापीन्द्र
द्याश्चाव्यवस्थिताः तृप्यंतुप्रीतमनसः प्रीताग्रह्णन्तुविमंबलिं तारत्रयंवदेदेहियुग्मं
देविपदंततः पुत्रायवटुकनाथायपश्चाद्दच्छिष्टहारिणे ग्रह्णयुग्मंहहपदंक्षेत्रपा
लपदंततः सर्वविघ्नान्यपदंपश्चान्नाशयद्वितयंततः सर्वोपचारसहितामिमांपूजां
बलिंवदेत ग्रह्णयुग्मंद्विवांतोयंक्षेत्रपालमनुःप्रिये चतुःषष्ट्यक्षरैः प्रोक्तः सर्वसि
द्धिप्रदायकः योस्मिन्क्षेत्रेनिनिवासीचक्षेत्रपालस्तुकिंकरः शीतोयंबलिदानेनसर्वं
रक्षांकरोतुमे तारत्रयंवदेदाद्यंश्रीप्रासादपरामनुं ह्रांह्रींह्रूंचयुगांतेथभैरवाधिष्ठि

तायच अक्षोभ्यांनंदतः पश्चात्स्मिदुदयाभीष्टतः परं ॥ सिद्धार्थपदमाभाष्यपश्चात्कुले
१६ श्वतरद्वयं क्षेत्रपालपदं पश्चान्महाशान्महाशास्त्रपदं ततः मातृपुत्रपदं पश्चात्कु
लपुत्रपदं भवेत् सिद्धपुत्रपदं वास्मिन्स्थानाधिपतये ततः अस्मिन्ग्रामाभिपयेस्मि
न्देशाधिपतये ततः मेघनादं पश्चात्प्रचंडोग्रपदं भवेत् कपाराग्भीमतत्पश्चाद्वीष
णेति पदं भवेत् स्यात्सर्वविद्याधिपतये इमां पूजां वलिं वेत् गृह्ण युग्मं तु युगं मुरव
र्णायय युग्मकं ज्वलयुग्मकप्रज्वलयुगं सर्वविघ्नं निवारय नाशयद्वितयं स्वांस्वां तत्पश्चा
त्स्वमितीरयेत् क्षेत्रपालाय वौषडंषड्युत्तरशताक्षरः तारत्रयं वदे पश्चादमुकक्षे
त्रपालच राजराजेश्वर इमां पूजां वलिमतः परं गृह्ण युग्मं द्विठांतीरोरष्टाविंशति राम०
भिः स्मृतः अनेन वलिदानेन वटुवर्गसमन्वितः राजराजेश्वरो देवो मे प्रसीदतु स १६

र्वंदा पश्चिमेवटुकंदेवमुत्तरे योगिनीवलिं पूर्वेमृतवलिंदद्यात क्षेत्रपालेच दक्षिणे
राजराजेश्वरंमध्ये पूजयेत्कुलनायिके अंगुष्ठानामिकाभ्यांतु वटुकस्यवलिः स्मृतः
तर्जनीमध्यमानामिकांग योगिनीवलिः अंगुलीभिश्चसर्वाभिरुक्तोमृतवलिः प्रिये
अंगुष्ठतर्ज्जनीभ्यांतु क्षेत्रपालवलिर्भवेत अंगुष्ठामध्यमाभ्यांतु राजाराजेश्वरस्यच
अथप्रयोगः तत्रप्रातः कृत्यादि मातृकान्यासांते शिरसि ब्रह्मणे ऋषये नमः मुखेज
गतीछंदसे हृदि श्रीमदर्द्धनारीश्वरापदेवतायै नमइति विन्यस्यमरुषोठान्यासेविनि
योगइति कृतांजलिरुत्काांगुष्ठयोः ऐं ह्रीं श्रीं ह्स्रौं स्हौं ईशानायनमः तर्ज्जन्योः ह्स्रौं
स्हौं तत्पुरुषायमध्यमयोः ३ ह्सुं स्हिं वामदेवाय पादयोः सद्योजाताय मध्यह्स्रां स्हें
ईशानायोर्द्धवक्राय मखे ह्स्यं स्हें तत्पुरुषाय पूर्ववक्राय दक्षकर्णो ह्सु स्हुं अघोराप

उ० ल्मा· दक्षिणवक्त्राय· वामकर्णौ ह्रिं ह्रिं वामदेवायोत्तरवक्त्राय चोरुरूपे ह्लं ह्लं सद्योजातायप
१८ श्चिमवक्त्रायन इति अंगन्यासः क्रमेणांगुष्ठादिपंचांगुलिभिरेकैकांगुल्यैकैकवक्त्रे
न्यस्तव्यः ततः ह्लां ह्लीमित्यादिना कर षडंगन्यासं कृत्वा प्रणामो कंदे वं ध्यात्वान्यसे
त् तत्रादौ प्रपंचन्यासो यथा ४ ह्लौः ह्लैः अं प्रपंचरूपायै श्रियै नमः एव ६ आं द्वी
परूपायै ६ ईं जलधिरूपायै कमलायै ६ ईं गिरूपायै विष्णुवल्लभायै ६ उं पत्तन
17 रूपायै पद्मधारिण्यै· ऊं पीठरूपायै समुद्रतनयायै· ऋं क्षेत्ररूपायै लोकमात्रे ६
ॠं वनरूपायै कमलवासिन्यै· ऌं आश्रमरूपायै इंदिरायै· ॡं गहरूपायै मायायै
एं तटीरूपायै रमायै· ऐं चत्वररूपायै पद्मायै ओं उद्भिज्जरूपायै नारायणप्रियायै· राम०
औं त्रुटिरूपायै· उमायै· अं कलनरूपायै चंडिकायै अः स्वेदजरूपायै सिद्धलक्ष्म्यै· अं १८

अं ऽजरूपायै: रालस्यै: अजरायुजरूपायैमहालस्यै: कं लवरूपायै आर्यायै· खं
त्रुटिरूपायै: उमायै· गं कलारूपायै चंडिकायै घं काष्ठारूपायै दुर्गायै· ङं निमेषरूपा
यै वै शिवायै· चं श्वासरूपायै अपर्णायै छं घटिकारूपायै अंबिकायै· जं मुहूर्तरू
पायै सत्यै· झं प्रहररूपायै ईश्वर्यै ञं दिनरूपायै शांभव्यै· टं संध्यारूपायै: ईशान्यै·
ठं रात्रिरूपायै पार्वत्यै· डं तिथिरूपायै मंगलायै· ढं वाररूपायै दाक्षायिण्यै· णं नक्ष
त्ररूपायै हैमवत्यै तं योगरूपायै महामायायै थं करणरूपायै महेश्वर्यै दं पक्षरू
पायै· मृडान्यै धं मासरूपायै रुद्राण्यै· नं राशिरूपायै शर्वाण्यै पं ऋतुरूपायै प
रमेश्वर्यै फं अयनरूपायै काल्यै बं वत्सररूपायै कात्यायन्यै भं युगरूपायै वाराह्यै गौ
र्यै मं प्रलयरूपायै भवान्यै· यं प्रपंचरूपायै ब्राह्म्यै रं पंचतन्मात्रारूपायै वागीश्वर्यै· लं

उन्मा पंचकर्मेंद्रियरूपायैवाराह्यैः वं पंचज्ञानेंद्रियरूपायैसावित्र्यै· परां पंचप्राणरूपायै
१८ सरस्वत्यै षं गुणत्रयरूपायैगायत्र्यै। सं अंतःकरणचतुष्टयरूपायै· हं अवस्था
त्रयरूपायैशारदायैः लं सप्तधातुरूपायैभारत्यै क्षं दोषत्रयरूपायै· विद्यात्मि
कायैनम इति मातृकास्थानेषु विन्यस्य· ऐं ह्रीं श्रीं ह्सौः स्हौः अं ५० सकलप्रपंचाधि
देवतायै श्रीपरांबादेव्यैनमः स्हौः ह्सौः श्रीं ह्रीं ऐं ॐ नम इति सर्वांगे व्यापकं कुर्यादि
18 ति प्रपंचन्यासः अथ भुवनन्यासः तत्र पादयोः ॐ ऐं ह्रीं श्रीं ह्सौः स्हौः अं आं इं अ
तललोकनिलयशतकोटिगुह्याद्ययोगिनीमूलदेवतायुताधारशक्त्यांबादेव्यैन
मः गुल्फयोः ६ ईं उं वितललोकनिलयशतकोटिगुह्यतरअनंतयोगिनीमूल राम०
देवता· जंघयोः ६ ऊं ऋं सुतललोकनिलयशतकोटिगुह्याचिंत्ययोगिनी १८

म्हलदेवतायुतजान्वोः ६ ल्हंएंऐंमहातललोकनिलयशतकोटिमहागुह्यस्वतंत्रयोगि
नीम्हल उर्वोः ६ ओंऔंतलातललोकनिलयशतकोटिपरमगुह्यच्छायायोगिनीम्ह
लास्फिचोः अंअः रसातललोकनिलयशतकोटिरहस्यज्ञानयोगिम्हलावारे ६
कंपपाताललोकनिलयशतकोटिरहस्यतरक्रियायोगिम्ह· स्वाधिष्ठाने ६ चं ५ म्हर्लो
कनिलराशतकोघतिरहस्यडाकिनीयोगिनीम्हल· मणिपूरके ६ वं ५ भुवर्लोकनिल
यशतंकोटिमहारहस्यराकिनीयोगिनीम्हलअनाहते ६ तं ५ स्वर्लोकनिलयशतको
टिपरमरहस्यलाकिनीयोगिनीम्हल। विशुद्धौ ६ पं महर्लोकनिलयशतकोटिगुप्तका
किनीयोगिनीम्हलआज्ञायां ६६ पं ४ जनलोकनिलयशतकोटिगुप्तरसाकिनीम्हल
·लाटेशं ४ तपोलोकनिलयशतकोटिगुप्तहाकिनीयोगिनीम्हलब्रह्मरंध्रेलं सं सत्यलो

उ०म्ना० कनिलयशतकोटिमहागुह्ययोकिनीमूलदेवताधारशक्त्यंवादेव्यैनमइतिविन्यस्य
१९ ६ अं ५० सकलभुवनाधिपायैश्रीपरावादेव्यैनमः स्हौः स्हौः श्रीह्रींऐं ॐ इतिव्यापकं
कुर्यादितिभुवनन्यासः अथमूर्त्तिन्यासः तत्रशिरसि ६ अंकेशवायाकारशक्त्यैनमः
मुखे ६ आंनारायणायापाद्यशक्त्यै· दक्षांसे ६ इंमाधवायैष्टदायै· वामांसे ६ ईंगोविंदा
19 यै·शानायै· दक्षपार्श्वे ६ उंविष्णवेउग्रायै· वामे ऊंमधुसूदनायोऊंनयनायै· दक्षकुक्षौ
६ ऋंत्रिविक्रमायऋद्ध्यै· वामायांॠंवामनायरूपिण्यै· दक्षोरौ· ऌंश्रीधरायऌमायै·
वामोरौ ॡंहृषीकेशायपलन्दोषायै· दक्षजानुनिएंपद्मनाभायैकनायिकायै· वामे
ऐं· वामे ऐंदामोदरायैकारिण्यै· दक्षजंघायां ओंवासुदेवायोघवत्यै· वामायांऔंसं एम०
कर्षणायौर्वकायै· दक्षपादे अंप्रद्युम्नायांजनप्रभायै वामे अः अनिरुद्धायास्थि १९

मालाधारिण्यै॰ दक्षपादाग्रादूरुमूलपर्यंतं ङंभंभवायकरभद्रायै॰ वामपादाग्रादूरुमू
लपर्यंतं खंवंशर्वायखगलायै॰ दक्षपार्श्वेगंफंरुद्रायगरिमलम्बायै वामपार्श्वेघंपपशु
पतयेघोरपादायै॰ दक्षोदोर्मूलेङे॰ नंउग्रायप नासायै॰ वामोदोर्मूलेवंधंमहादेवाय
चंद्रार्द्धधारिण्यै कंठेछंदोमध्ये॰ वदनेजंथंईशानायजगत्स्थानायै॰ दक्षकर्णेभूतंतत्पु
रुषायभूंकृत्यै॰ वामेत्रंणांअघोरायज्ञानदायै॰ भालेटंवंसद्योजातायरंकठकाधरायै
शिरशिठंडंवामदेवायभूंकृतिडामर्यै॰ मूलाधारेयंब्रह्मरोपक्षिण्यै॰ स्वाधिष्ठानेरं
प्रजायतयेरंजिन्यैमणिपूरकेलंवेधसेलक्ष्म्यैअनाहतेवंपरमेष्ठिनेवज्रिन्यै॰ वि
विशुद्धौशंपितामहायशशिधरायै॰ आज्ञायांषंविधात्रेषडाधारलपायै॰ अर्द्धेंदौसंवि
रंचयेसर्वनायिकायै॰ रोधिन्यांहंस्रष्ट्रेहसिताननायै नादेलंचतुशतनायललितायै

उ० म्ना० नादांते क्षं हिरण्यगर्भाय क्षमायै तमइत्येवं विन्यस्य ॐ ऐं ह्रीं श्रीं ह्सौं स्हौः सकलत्रि
२० मूर्त्यात्मिकायै श्रीपुरंवादेव्यै नमः स्हौः ह्सौः श्रीं ह्रीं ऐं ओं इति व्यापकं कुर्यादिति म
20 त्रिंन्यासः अथ मंत्रन्यासः तत्र मूलाधारे ६ अं आं इं एकलक्षकोटिभेदप्रणवाद्येका
क्षरात्मकाखिलमंत्राधिदेवतायै सकलफलप्रदायै द्विकूटेश्वर्यै वादेवी मणिपूरके
६ अं क्रं त्रिलक्षकोटिभेदवह्न्यादित्र्यक्षरात्म त्रिकूटेश्वर्यै वादेव्यै अनाहते ह्रं ऐं ऐं
चतुर्लक्षकोटिभेदचंद्रादिचतुरक्षरात्म चतुःकूटेश्वविशुद्धौ ओं औं अं अः पंचल
क्षकोटिभेदसूर्यादिपंचाक्षरात्म पंचकूटे आज्ञायां कं खं षट्लक्षकोटिभेदस्कंदा
दादिषडक्षरात्म षट्कूटे विंदौ घं टं चं लक्षकोटिभेदगणपत्यादिसप्ताक्षरात्म सप्तकूटे एम०
अं ईं हौं छं जं झं अष्टलक्षकोटिभेदवटुकाद्यष्टाक्षरात्म अष्टकूटेश्व रोधिन्यां जं ठं ठं २०

नवलक्षकोटिभेदब्रह्मादिनवक्षरात्मनवकूटे· नादे डं ढं णं दशलक्षकोटिभेदविष्ण्वादिद
शाक्षरात्मदशाकूटे· नादांते तं थं दं एकादशलक्षकोटिभेदरुद्राद्येकादशाक्षरा· एकाद
शकूटे· शक्त्यौ धं नं यं द्वादशलक्षकोटिभेदवारायादिद्वादशाक्षरा· द्वादशकूटे व्यापिका
यां फं वं मंत्रयोदशलक्षकोटिभेदलक्ष्म्यादित्रयोदशाक्षरात्रयोदशकूटे समानास्थ
नेमं पं रं चतुर्दशलक्षकोटिभेदगौर्यादिचतुर्दशाक्षरात्मा चतुर्दशकूटे उन्मन्यां लं वं
शं पंचदशलक्षकोटिभेदे दुर्गादिपंचदशाक्षरा पंचदशकूटे· ध्रुवमंडले खं सं हं लं क्षं
षोडशलक्षकोटिभेदत्रिपुरादिषोडशाक्षरात्मकाखिलमंत्राधिदेवतायै षोडशकूटे
स्वपर्य्यवादेव्यै नम इति विन्यस्य ३० ऐं ह्रीं श्रीं ह्सौः स्हौः क्ष्रं ५० सकलमंत्राधिदेवतायै
श्रीपरांबादेव्यै नमः स्हौः ह्सौः श्रीं ह्रीं ऐं क्ष्रों इति व्यापकं कुर्यादिति मंत्रन्यासः तत्र दक्ष

पादे द अं आं सहस्रकोटिऋषिकुलसेवितायैनिवृत्त्यंवादेव्येनमः वामे द इं ईं सहस्र
२१ कोटियोगिकुलसेवितायेप्रतिष्ठाम्बादेव्ये· दक्षगुल्फे उं ऊं सहस्रकोटितपस्विकुलपेवि
द्यांवा· वामे ऋं ॠं सहस्रकोटि शांतकुलसेवितायै शांत्यंवादेव्ये· दक्षजंघायां लृं ॡं
सहस्रकोटिमुनिसेवितायै शांत्यतीतां देव्ये· वामायां एं ऐं सहस्रकोटिदेवतकुलसेवि
तायै· ह्लेखांवादेव्ये· दक्षजानुनि ओं औं सहस्रकोटिराक्षसकुलसेवितायैगगनांवा
21 देव्यै वामे अं अः सहस्रकोटिविद्याधरकुलसेवितायै रक्तांवादेव्ये· दक्षरोः कं खं सह
स्रकोटिसरकुलसेवितायै जयांवा· वामोरुम्ले छं जं सहस्रकोटिगंधर्वकुलसेविता
यै जयांवा: दक्षपार्श्वे भं सहस्रकोटिगुह्यककुलसेवितायै अजितांवादेव्ये· वामे ठं एम०
ठं सहस्रकोटियक्षकुलसेवितायै अपराजितांवादेव्ये· दक्षस्तने डं ढं सहस्रकोटिकि २१

न्नरकुलसेवितायै वामां वा। वामे गां नं सहस्रकोटिपन्नगकुलसेवितायै ज्येष्ठां वा देव्यै॰
दक्षदोर्मूले थं दं सहस्रकोटिपितृकुलसेवितायै रौद्रीं वा देव्यैः वामे धनं सहस्रकोटिगणे
श्वरकुलसेवितायै मायां वा देव्यै॰ दक्षभुजे पं फं सहस्रकोटिभैरवकुलसेवितायै कुंड
लिन्यं वा देव्यै वामे वं भं सहस्रकोटिवटुककुलसेवितायै काल्यं वा देव्यै॰ दक्षांसे मं यं स
हस्रकोटिक्षेत्रेशकुलसेवितायै कालरात्रिं वा देव्यै वामे रं लं सहस्रकोटिप्रथमकुल
सेवितायै त्वाकस्वं वा देव्यै॰ दक्षकर्णे वं शं सहस्रकोटिब्रह्मकुलसेवितायैः सर्वेश्व
र्यं वा देव्यै वामे षं सं सहस्रकोटिविष्णुकुलसेवितायै सर्वज्ञां वा देव्यै॰ भाले हं लं सह
स्रकोटिरुद्रकुलसेवितायैः सर्वकर्त्री वा देव्यै॰ ब्रह्मरंध्रे ६ क्षं सहस्रकोटिचराचर
कुलसेवितायै कुलशक्तिं वा देव्यै नमः इति विन्यस्य ६ अं ५० समस्तदेवताधिपायै

उ० म्ना० श्रीपरांवादेव्यैनमः सस्हौंः रस्लौंः श्रीं ह्रीं ऐं श्रों इति व्यापकं कुर्यादिति देवतान्यासः॥ ॥
२२ अथ मातृकान्यासः॥ ॥ तत्र मस्तकाधीरे ६ कं ४ अनंतकोटिभूचरीकुलसहितायै श्रां
क्षांमंगलांवादेव्यै श्रां सां व्रह्माण्यंवादेव्यै अनंतकोटिभूतकुलसहिताय श्रं क्षं मं
गलयोनाय श्रं क्षं असितांगभैरवायनमः स्वाधिष्टाने ६ वं ४ अनंतकोटिखेचरीकु
22 लसहितायैं ईल्लां चर्चिकांवादेव्यै ईलां माहेश्वर्यंवादेव्यै अनंतकोटिवेतालकुलसहि
तायइंलंवर्चिकनाथाय इंलं रुरुभैरवाय मणिपूरके ठं ४ अनंतकोटिपातालचरीकु
लसहितायै ऊं हां योगेश्वर्यंवादेव्यै उं हां कौमार्यंवादेव्यै अनंतकोटिपिशाचकुल
सहिताया उं हं योगेश्वरनाथाय उं हं चंडभैरवायः अनाहते ६ तं ४ अनंतकोटिदिक एम०
रीकुलसहितापै ऋं सां हरसिद्धांवादेव्यै ऋं सां वैष्णव्यंवादेव्यै अनंतकोघपस्मारकु २२

लसहितायक्रंसंहरसिद्धनाथायक्रंसक्रोधभैरवायविशुद्धौ ६ प ४ अनंतकोटिसहच
रीकुलसहितायैहंषंभद्दिन्यंबादेव्यैहंषांबरात्संवादेव्यैअनंतकोटिब्रह्मराक्षसकुल
सहितायल्हंषंभद्दिनाथायल्हंषंउन्मत्तभैरवाय· आज्ञायां ६ यं ३ अनंतकोटिगिरिच
रीकुलसहितायैऐंशांकिलिकिलांबादेव्यैऐंशांइद्राण्यंबादेव्यै· अनंतकोटिचेटकक
लसहितायऐंशंकिलिकिलनाथायऐंशंकपालिभैरवायः भाले ६ शं ३ अनंतकोटि
वनचचरीकुलसहितायैओंवांकालरात्र्यंबादेव्यैओंवांचामुंडांबादेव्यैअनंतकोटिप्रे
तकुलसहिताओंवंकालशक्तिनाथायओंवंभीषणभैरवायब्रह्मरंध्रे ६ लंक्षंअनंत
कोटिजलचरीकुलसहितायैअः लांभीषणांबादेव्यैअः लांमहालक्ष्म्यंबादेव्यैअनं
तकोटिकूष्मांडकुलसहितायैअंलंभीषणनाथायअंलंसंहारभैरवायनमइतिवि

उ० म्ना० न्यस्य ६ ऋं ५० समस्तमातृभैरवाधिदेवतायै श्रीपरांवादेव्यै नमः स्त्रौंः सौः श्रीं ह्रीं ऐं
२३ ३० इति व्यापकं कुर्यादिति मातृकान्यासः॥ ॥ इति महाषोढान्यासः॥ ॥ ततः स्वेव
त्कर षडंगन्यासं विधाय पूर्वोक्तरूपं देवं स्वभावेन ध्यात्वा योनि लिंग धेनु कपाल ण
न त्रिशूल पुस्तक वन माला नमस्कार महामुद्राख्या दश मुद्रा विरच्या शिरसि श्रीगु
रुं सहस्रदलपंकजे इत्यादि श्लोकोक्तरूपं ध्यात्वा तद्दिशया तत्पादुकां शिरसि वि
न्यस्य प्रणम्य स्वसंकेतनाम मूलाधारे विन्यस्य शिवरूपमात्मानं ध्यात्वा महाषो
ढान्यास माहात्म्यं पूर्वोक्तं स्मरेदिति महाषोढान्यासं विधाय योगपीठन्यासं ततो मूले रा० म०
न प्राणायामत्रयं कृत्वा शिरसि ब्रह्मणे ऋषये नमः मुखे जगती छंदसे हृदि श्रीमद २३
र्द्धनारीश्वराय देवतायै नम इति विन्यस्य स्त्रां स्त्रीमित्यादिना करषडंगन्यासं कृत्वा

मणामोक्तरूपं देवं ध्यात्वामानसोपचारैः संपूज्य त्रिकोणगर्भमष्टदलकमलं कृत्वा तद्
द्भिः षड्विंशतिदलं तद्बहिः षोडशदलं तद्बहिरष्टत्रिंशद्दलं तद्बहिश्चतुर्द्दशदलं तद्बहिरेकं
मलं कृत्वा तद्बहिः षड्विंपंचाशद्दलमिति पूजाचक्रं चतुरश्रोपेतं निर्माय तत्र मूलेन पुष्पां
जलिं दत्वा प्रागवत्यात्रस्थापनादि पुष्पोपचारांते ह्सां ह्सीमित्यादिना षडंगं संपूज्य त्रिको
णाष्टदलयोरंतराले पंक्तिये णोद्धौ न्मायगुरुन् दिव्यसिद्धमानवक्रमेण ध्यात्वा प्रथम
रेखायां दिव्योघेभ्यः परात्परेभ्यो गुरुभ्यो नम इति पुष्पांजलिं दत्वा ॐ ऐं ह्रीं श्रीं आदिना
थपरशिवाय नमः एवं आदिशक्तिपरशिवायै ४ सदाशिवपरशिवाय ४ सदाशिवा
परशिवायै· ईश्वरपरशिवाय· ईश्वरीपरशिवायै· रुद्रपरशिवाय· रुद्राणीपरशिवायै·
विष्णुपरशिवाय· वैष्णवीपरशिवाय ब्रह्माणीपरशिवायै नम इति इति संपूज्य द्वितीं

उ॰ मा॰ परेखायां सिद्धौघेभ्यः परारव्येभ्यो गुरुभ्यो नमः ॐ ऐं ह्रीं श्रीं सनकमहाशिवाय नमः ४
२४ सनंदनमहाशिवाय ४ सनातनमहाशिव ४ सनत्कुमारमहाशिवाय· सनत्सुजातम
हाशिवाय ऋभुमहाशिवाय दत्तात्रेयमहाशिवाय· रैवतकमहाशिवाय वामदेवम
हाशिवाय· व्यासम· शुकमहाशिवाय नम इति संपूज्य तृतीयरेखायां ४ मानवौघेभ्यः
परारव्येभ्यो गुरुभ्यो न इति पुष्पांजलिं दत्वान्त्रसिंह सदाशिवाय· महेश सदाशि· भास्क
24 रसदा· महेंद्रसदाशिवाय· माधवसदा· विष्णुसदाशिवाय नम इति संपूज्य ततः सर्वदा
स्थगतैकपंचाशद्दलकमले ४ एकपंचाशद्दलपद्माय नम इति पुष्पांजलिं दत्वा ततो
देवं यद्दलमारभ्य ॐ ऐं ह्रीं श्रीं ह्स्लौं: स्हौः अप्रपंचरूपायै श्रियै नमः ६ अंद्वीपरूपा राम॰
यैमायायै नमः एवं प्रपंचन्यासोक्तैकपंचाशद्देवतावामावर्त्तेन संपूज्य ६ ॐ ऐं ह्रीं २४

सोंस्हौंः अं ५० सकलप्रपंचाधिदेवतायै परांवादेव्यै नमः स्हौंः श्रीं ह्रीं ऐं ॐ इतिपुष्पां
जलिंदत्वा ६ अभीष्टसिद्धिमित्यादिश्लोकंपठित्वापुष्पांजलिंदत्वाप्रपंचदेवतामय
त्वाय श्रीमदर्द्धनारीश्वरायनमइतिप्रणामेत् ततश्चतुर्द्दशदलपद्मायनमइतिपु
ष्पांजलिनासंपूज्य देवाग्रमारभ्य ६ अं आं इं अतललोकनिलयेत्यादिशक्त्यैवा
देव्यैनमइत्येवंभुवनन्यासोक्तचतुर्द्दशदेवतावामावर्त्तेनसंपूज्य ६ शमस्तमातृका
मुच्चार्यसकलभुवनाधिपायै श्रीपरांवादेव्यैनमः स्हौंः स्हौंः श्रीं ह्रीं ऐं ॐ इतिपुष्पां
जलिंदत्वाप्राग्वद्द्वितीयावरणपूजांसमर्प्य ततः ६ अष्टत्रिंशद्दलकमलायनमइ
तिपुष्पांजलिंदत्वा ६ अं केशवाय आक्षरशक्त्यैनमइत्यादिमूर्त्तिन्यासोक्ता अष्टत्रिं
शद्देवतावामावर्त्तेनसंपूज्य ६ अं ५० सकलत्रिमूर्त्यात्मिकायै श्रीपरांवादेव्यैन

25

मः स्हौंः स्हौं श्रीं ह्रीं ऐं इति पुष्पांजलिं दत्वा प्राग्वत्तृतीयावरणपूजां समर्पयेत् ततः षो
डशदलपद्मायनम इति प्राग्वत्संपूज्य तथैव ६ अं आं ईं एकलस्सकोटिभैरवइत्यादि रा
कं कूटेस्वर्यंवादेव्यैनमः इत्येवं वामावर्त्तेन षोडशदेवताः मंत्रन्यासोक्ताः संपूज्य
६ ऐं ५० सकलमंत्राधिदेवतायै नमः स्हौः स्हौः श्रीं ह्रीं ऐं ३० इति प्राग्वत्संपूज्य प्रा
ग्वच्चतुर्थावरणं समर्प्य षड्विंशतिदलपद्मायनम इति पुष्पांजलिं दत्वा ६ अं आं स
हस्रकोटीत्यादि निष्टत्यं वरदेव्यैनम इति देवतन्यासोक्ताः षड्विंशति देवताः संपू
ज्य ६ ऐं ५० समस्तदेवताधिपायै श्रीपरांवादेव्यैनम इति प्राग्वत्संपूज्य प्राग्वत्पं
चमावरणं समर्पयेत् ततः ६ अष्टदलकमलायनम इति प्राग्वत्संपूज्य ६ ऐं ५० स
मस्तमातृभैरवाधिदेवतायै श्रीपरांवादे अनंतकोटिभैरवीत्यादि असितांग

भैरवाय नम इत्येवं मातृकान्यासोक्ता अष्टदेवताः संपूज्य ६ अं ५० समस्तमातृभै
रवाधिदेवतायै श्रीपरांबादेव्यै नम इति पुष्पांजलिं दत्वा प्राग्वत्षष्ठावरणं समर्प्य
ततश्चतुरस्रे लोकपालांस्तदस्त्राणि च संपूज्य धूपादि विधाय नित्यहोमांते पूजा
चक्रस्य पश्चिमभागे चतुरस्रं तत्र त्रिकोणात्मकं मंडलं विरच्य तत्र वटुकमंत्रेण
तमावाह्य गंधाद्यैरुपचारैः संपूज्य तत्र सान्नव्यंजनजलपूर्णं साधारं बलिपात्रं
निधाय ऐं ह्रीं श्रीं देवीपुत्र वटुकनाथ पिंगलजटाभारभासुर पिंगलत्रिनेत्र ज्वाल
मुख इमां पूजां बलिं गृह्ण गृह्ण स्वाहेति मंत्रेण वामांगुष्ठानामिकाभ्याम र्घोदक
धारदानेन बलिमुत्सृज्य बलिदानेन संतुष्ट इत्यादि मंत्रेण पुष्पांजलिं दत्वा उत्त
रे तथैव मंडलं कृत्वा योगिनीमंत्रेण तथैव संपूज्य तत्र प्राग्वद्बलिपात्रं निधाय

उ०म्ला० ऐं ह्रीं श्रीं सर्वयोगिनीभ्यः सर्वभूतवर्त्तिनीवंदिनीभ्यो डाकिनीभ्यः शाकिनीभ्यस्त्रैलो
२६ क्यवासिनीभ्यः इमां पूजां बलिं गृह्ण गृह्ण स्वाहेति वाम तर्ज्जनीमध्यमानामाभिर्यो
न्याकारेण पूर्ववद्बलिमुत्सृज्य याकाचिद्योगिनी घोरेति मंत्रेण पुष्पांजलिं सम
र्प्यः ततः पूर्वे तथैव मंडलं विधाय तत्र सर्वभूतमंत्रेण पूर्ववद्गंधादिभिः संपूज्य
26 तत्र बलिपात्रं निधाय ऐं ह्रीं श्रीं सर्वभूतेभ्यः सर्वभूतपतिभ्यो नम इति मंत्रेण वा
मांगुलिभिः माषबलिमुत्सृज्य भूताये विविधाकारा इति मंत्रेण पुष्पांजलिं दत्वा
ततो दक्षिणे तथैव मंडलं कृत्वा तत्र क्षेत्रपालमंत्रेण संपूज्य माषबलिपात्रं नि
धाय ॐ ऐं ह्रीं देहि देवीपुत्राय वटुनाथाय उच्छिष्टहारिणे गृह्ण गृह्ण हुरु हुरु क्षेत्र एम०
पाल सर्वविघ्नान्नाशय सर्वोपचारसहितामिमां पूजां बलिं गृह्ण गृह्ण स्वाहेति २६

मंत्रेणावामांगुष्ठतर्जनीभ्यां पूर्ववद्बलिमुत्सृज्य योऽस्मिन् क्षेत्रे निवासी चेति मं
त्रेपुष्पांजलिं समर्प्याथवा ऐं श्रीं ह्रीं सौः क्षां क्षीं क्षूं ह्रां ह्रीं ह्रूं भैरवाधिष्ठितायाः क्षोभ्या
नंदोदयायाभीष्टसिद्ध्यर्थमवतरावतर क्षेत्रपाल महाशास्त्रमातृपुत्रकुलपुत्र
सिद्धपुत्रास्मिन्स्थानाधिपतये अस्मिन्ग्रामाधिपतये अस्मिन्देशाधिपतये मेघ
नादप्रचंडोग्रकृपाणभीमभीषण सर्वविघ्नाधिपतये इमां पूजां बलिं गृह्ण गृह्ण
रुरु रुमु रुरु चूर्णाय चूर्णाय ज्वल ज्वल प्रज्वल प्रज्वल सर्वविघ्नान्निवारय नाशय
नाशय क्षां क्षीं क्षूं क्षेत्रपालाय वौषट् ॐ इति मंत्रेणावापूर्ववद्बलिमुत्सृजेत् त
तश्चाग्नेयकोणमागुन्मंडले राजराजेश्वरमावाह्य गंधादिभिः संपूज्य तत्रमा
षबलिपात्रं निधाय ऐं ह्रीं श्रीं अमुक क्षेत्रपालराजराजेश्वर इमां पूजां बलिं गृ

उ० म्ना०
२७
ह्स्ग्र ह्स्ग्र स्वाहेति मंत्रेणांगुष्ठमध्यमाभ्यामर्घोदकधारादानेन बलिमुत्सृज्यात
नबलिदानेनेति मंत्रेण पुष्पांजलिं दत्वा नीराजनादिकं शेषं प्राग्वत्समापयेदि
ति तथा मंत्री विशुद्धहृदयः पूर्वोक्तनियमान्वितः श्रीप्रासादपरामंत्रं तत्वसं
जपेत्प्रिये दशांशं जुहुयाद्धविसंस्कृते हव्यवाहने गंधपुष्पाक्षताकल्पधेनु
27
वस्त्रादिभिः प्रिये भक्ष्यभोज्यान्नपानाद्यैः कुलद्रव्यैर्मनोहरैः तोषयेद्योगिनी
चक्रं यथाविभवविस्तरं एवं न्यासजपध्यानसहोमार्चनतर्प्पणैः मंत्री सिद्धम
नुर्देवि साक्षात्स्याच्छिवो भवेत् ततः स्वमंत्रतो भीष्टान्प्रयोगान्कुलनायिके मंत्रेणा
तेन मतिमान्साधयेद्भुक्तिमुक्तये सिद्धमंत्रस्य सिद्ध्यंति षट्कर्माणि न संशयः नै एम०
व सिध्यंत्यसिद्धस्य देवताशापमाप्नुयात् काम्यप्रयोगकर्तॄणां परलोके न विद्यते प्र २७

योगसिद्धिरेवैषां फलमन्यत्र च प्रिये एकस्यापि विधानस्य न कृत्वापि फलद्वयं दे
वेशि दृश्यते तस्मान्निः कामो देवतां भजेत् होमतर्पणगायंत्राद्यैर्ताना ध्यानविशेष
जैः आत्मनश्च परस्यापि षट्कर्माणि समाचरेत् प्रयोगांते चक्रपूजां तिथिनैव
समाचरेत् एवंलक्षजपेन्मंत्रं ध्यानन्याससमन्वितः प्रयोगदोषशांत्यर्थमात्म
रक्षार्थमेतच्च नचेत्फलं च नाप्नोति देवताशापमाप्नुयात् तिथिवारर्क्षकरणयो
गमासर्तुपक्षकं द्वीपेशकूर्मचक्रादिज्ञात्वा कर्माणि साधयेत् पंचशुध्यासनं
मारणमंत्रन्यासास्तु मालिकाः दोषसंस्कारमुद्रादीन्ज्ञात्वा मंत्राणि साधयेत्
द्विषद्दाधवर्णाख्यराशिवर्णानुकूलता भूतमैत्रीमथाद्यं तं ज्ञात्वा मंत्राणि सा
धयेत् मंत्रविद्याभेदनिद्राचोधा। मौसोमसूर्यकं पंस्त्रीतपुंसकादिं च ज्ञात्वा मं

उ०म्ना० त्राणिसाधयेत् अथनाममन्त्रादिवर्णनाडीतत्त्वानुसंगतिं देवताकालमुद्रादीन्ज्ञा
२८ त्वाकर्माणिसाधयेत् साध्यासाधककर्माणिलेखद्रव्यपंचकं स्थानंयंत्रप्रमाणंच
ज्ञात्वायंत्राणिसाधयेत् उत्पत्तिरसनावर्णमूर्त्तिसंस्कारसंस्थितिं कुंडद्रव्यप्रमा
णादीन्ज्ञात्वाहोमंसमाचरेत् धामप्रभाधूमवर्णध्वनिगंधाशिखाकृतिं हूतचेष्टा
दिकंज्ञात्वाकथयेत्शुभाशुभं मंत्रतत्त्वानुसंधानंदेहावेशादिलक्षणं मंत्रोच्चा
रणभेदंचज्ञात्वामंत्राणिसाधयेत् मंडलंकालशंकाथोदकंगंधाष्टकादिकंदीक्षा
नामप्रदानादिज्ञात्वादीक्षांसमाचरेत् नित्यंनैमित्तिकंकाम्यंनियमंनामवासना
पूजाधारणायंत्रादिज्ञात्वाकर्माणिसाधयेत् पूजागृहप्रवेशादिकुलपूजकल एम०
क्षणं कुलद्रव्यादिसिद्धिंचज्ञात्वापूजासमाचरेत् अंतेयोगंवदेद्योगमध्यादि २८

स्थापनार्चनं पंचपुष्पांजलिं देवि ज्ञात्वा पूजां समाचरेत् पात्राधारादिपिशितं
कुलमेलनतर्पणं वटुकादिबलिं देवि ज्ञात्वा पूजां समाचरेत् कुलाकुलाख्यास
र्वजाशक्तिभेदं च लक्षणं शुभलक्षणासंयुक्तं स्त्रीसंस्कारार्चनादिकं देवि संभोग
29 कालं च ज्ञात्वा शक्तिं परियदेत इत्याद्याः कथिताः केचिद्विशेषाः कुलनायिके
सर्वेषामपि मंत्राणां विधिः साधारणक्रमः मंत्राः फट्देवताः हुंफडंताः प्राणेच
दक्षिणे प्रबुध्यंते द्विठांताः स्युर्विद्याः स्त्रीदेवताः प्रिये वामप्राणप्रबुध्यंते नमों
ताः स्युर्नपुंसकाः नाडीद्वयगते प्राणे सर्वे बोधं प्रयांति च शांतिमनवः सौम्या
भूयिष्टा नमन्तादराः स्वाहांताः स्युर्वियस्ता क्षाश्चाग्नेयाः क्रूरकर्मसु फट्स्वा
हे टे वषट् वश्ये हुं द्वेषे स्ये च मारणे। स्तंभने च मनः प्रोक्तं स्वाहा शांतिकपौष्टिके ना

मतर्प्पणायोः स्वाहान्यासजनयोर्नमः मंत्रांते योजपेन्मंत्री जपकाले यथास्थितं
शांतिके राजतं ताम्रं भूर्जे पत्रे तु वश्यके सर्वकार्येषु सौवर्णं क्रूरे स्यात्प्रेतकर्पटं त्रि
गंधं शांतिके प्रोक्तं पंचगंधं तु वश्यके सर्वकार्येषु गंधः स्यात्क्रूरे चाष्टविषाणि च
शांतिके लेखनी दूर्वा वश्यादौ शिखिपिच्छिका हेम्नः सर्वाणि कार्याणि क्रूरे स्यात्काक
पिच्छिका गृहे तु शांतिकं स्याद्वश्याद्यं चंडिकालये सर्वकार्यं देवगृहे श्मशाने क्रू
रकर्म च लक्षणान्येवमादीनि ज्ञात्वा गुरुमुखात्प्रिये सर्वकर्माणि कुर्वीत मंत्री
तत्फलाप्तये मूले प्रासादबीजं तु महसायुतसन्निभं उन्मनांगे परां बीजं चंद्रायु
तसमप्रभं परस्परकरस्पर्शज्वालितानंदनिर्भरैः मूलादिब्रह्मरंध्रांतमनव एम०
च्छिन्नरूपिभिः परस्परसमासक्तैः सिक्तमापादमस्तकं आत्मानं भावयेन्नित्यं स्त २९

भयेदजरामरः एवंध्यात्वाकुलेशानिसर्वकर्माणिसाधयेत् सिध्यंतितरसा
देविनात्रकार्याविचारणा ध्यानभेदंप्रवक्ष्यामिसर्वसिद्धिकरंप्रिये ईप्सितंलभ
तेयेनपूजाहोमादिकंविना स्थानेमातोहरेदेविसाधकःस्थिरमानसः स्थित्वाप
द्मासनेध्यायेद्गुरुवंदनपूर्वकं मस्तकस्थितसंपूर्णचंद्रमंडलमध्यगे श्रीप्रासा
दपराबीजंषोडशशक्तिसंयुतं मुक्तास्फटिककर्पूरकुंदेंदुधवलंप्रिये सचंद्रबिंब
संजातसुधाप्लावितविग्रहं आत्मानंभावयेद्देविनिश्चलेनांतरात्मना श्रीप्रासा
दपरामंत्रमष्टोत्तरसहस्रकं तरुणोल्लाससहितोमंडलंप्रजपेत्प्रिये अपमृत्युम
हारोगजरामरणजंभयं ग्रहापस्मारवेतालभूतोन्मादादिजंभयं जित्वाधिव्याधि
रहितःपुत्रपौत्रसमन्वितः जीवेद्वर्षशतंसाग्रंपूजितःसर्वमानवैः अक्षतंबुध्य

उ० म्ना० तेशास्त्रंकवितानिर्मल्लाभवेत् चिंतायोजायतेसाक्षान्नात्रकार्याविचारणा ज्वरोन्म
३० हादिरोगेषुजपेच्छिरसिसिंचयेत् शूलवातव्रणग्रंथिमस्तकक्षुद्रादिसंभवैः तत्र
स्थानेषुदेवेशिएवंवच्चिंतयन्जपेत् महारोगेषुजातेषुसर्वांगेषुविचिंतयेत् तत्
30 क्षणाच्छांतिमायांतिरोगाः सर्वेनसंशयः दशेंद्रियेषुयोध्यायेत्कर्मेंद्रियसोप्येवं य
त्रबीजंस्मरेत्तत्रतत्फलंभवतिध्रुवं सदासंचिंतयेन्मूर्द्धिसभवेदजरामरः सर्वरो
गहरंविद्यात्सदारोग्यंचपरंप्रिये अस्मात्परतरंध्यानंनास्तिसत्यंनसंशयः सात्वि
कंध्यानजंदेविफलमेतदुदीरितं शांतिकर्मणिविधिनाध्यानेनानेनसाधयेत्
द्वादशाधारपद्मेषुद्वादशवरसंयुतं बीजंसंचिंतयेद्यस्तुसभवेदजरामरः षडाधा एम० ३०
रेषुषड्दीर्घयुतंबीजंविचिंतयेत् षडाधारस्थदेवीभिः पूज्यतेकुलनायिके ॥

स्वप्नकर्णिकामध्येस्सूर्यमंडलसंस्थितं परप्रासादबीजंतदरुणारुणसंनिभं जपा
वंध्रूकसिंदूरपद्मरागप्रभोज्वलं पंचविंशतिभिः स्पर्शाद्यैरावीतमंबिके तत्प्रभा
पटलछायारक्तीकृतजगत्त्रयं आत्मानंसंस्मरेद्देवि निश्चलेनांतरात्मना परप्रा
सादबीजंतंयौवनोल्लाससंयुतं अष्टोत्तरसहस्रंतुमंडलंप्रजपेत्सुधीः देवदान
वगंधर्वसिद्धगुह्यककिंनरान् विद्याधरान्मुनीन्यक्षान्न्यानप्सरः स्त्रियः सि
द्धव्याघ्रोरगेंद्रादीनन्यादुष्टमृगानपि वशीकरोत्यसंदेहः किंपुनर्मानवादिकान्
महदैश्वर्यमाप्नोतिस्वर्गभोगादिकंप्रिये यस्यमूर्ध्निस्मरेन्नजप्यात्सवश्योजाय
तेचिरान् राजसध्यानजंदेवि फलमेतदुदीरितं वश्यकर्माणिसर्वाणिविधिना
नेनसाधयेत् सर्ववश्यकरंदेविसर्वैश्वर्यफलप्रदं अस्मात्परतरंध्यानंनास्तिस

उ०म्ला० त्यंनसंशयः मूलाधारसरोजांतर्वह्निमंडलमध्यगं परांप्रासादबीजंतंकालांताग्नि
३१ समप्रभं प्रतिलोमेस्तसंपीतंदशभिर्व्यापकाक्षरैः स्वयंजज्वालानलः सम्यक्तर्वभूत
भयंकर दृष्टिणाशालितमुखश्चोग्रदृष्टिर्मलोमसः यौवनोल्लाससहितःपराप्रासा
दसंज्ञकं मंत्रंतुमंडलंजप्यादष्टोत्तरसहस्रकं अनिष्टकारिणसत्वान्कलहपास
31 कारिणः इत्याद्युपकरानक्रूरान्सपर्याविघ्नकारिणः भूतोयग्रहवेतालपिशाचब्र
ह्मराक्षसान् तद्वह्निमध्यपतितान्निदग्धांश्चविचिंतयेत् रोगोननाशमायातिश
रणाद्भवपार्वति यस्यमूर्द्धिस्मरेद्बीजंसमृत्युमधिगच्छति ध्यानेनानेनदेवेशिका
लादीनपिनाशयेत् यद्रोगादिदुष्टादिविनाशनकरंप्रिये अस्मात्परतरंध्यानं राम०
नास्तिसत्यंनसंशयः तामसध्यानजंदेविफलंमेतदुदीरितं एवमारणकर्मा ३१

विधिनानेन साधयेत् इत्यादि ध्यानभेदांश्च ज्ञात्वा गुरुमुखात्प्रिये षट्कर्माणि प्रयं
जीत नान्यथा वीरवंदिते खदिरश्वेतमंदारारक्तामानुसमिद्धरैः पनसोदुंबराश्वत्थ
लसायामार्गसद्धरैः नंद्यावर्त्तसितांभोजभयादिकुसुमादिभिः सितैरन्यैः शुभ
द्रव्यैः शमित्यत्रफलार्त्तवैः भस्मैश्चपापसैः दूर्वासद्विभित्तन्तंडुलैः मधुरत्रयसं
युक्तैर्मन्त्रविद्वि कुलनायिके एकेनवाथ सर्वैर्वा तत्कार्यं गुरुलाघवं ज्ञात्वा देवि सह
स्रं वा त्रिसहस्रं तु पंच वा। अयुतं नियुतं वापि प्रयुतं वा कुलेश्वरि तत्क्रमोदिते कुं
डे संस्कृते हव्यवाहते आवाह्य देवतामस्मिन् ध्यात्वा सावरणां प्रिये विधिवज्जुहु
याद्देवि तद्गतेनांतरात्मना सर्वरोगज्वरोन्मादापस्मारोत्यातकृत्यजं सर्वदुःखं प्रश
मयेत्क्षणान्नात्र संशयः अनेन सर्वशांतिश्च विद्या ज्ञानं लभेत्प्रिये कदंवाशो

उ० म्ना० शोकवकुलपुन्नागान्नमधुकजैः चंपकहृद्यपालाशपाटलश्रीकपित्थजैः मालती
३२ मल्लिकाजातिवंधूकारुणापंकजैः कल्हाराम्राणामंदारजातिकुंदजपादिभिः रक्तैरन्यैः
शुभद्रव्यैः समित्यत्रफलार्णवैः एवं यज्जुहुयाद्देवि विधिवन्मंत्रवित्तमः महीपती
32 श्चपुरुषान्कांतायौवनगर्विताः सिंहान्मत्तगजान्व्याघ्रान्सर्पांस्तुष्टमृगानपि सि
द्धदेवाप्सरोयक्षगंधर्ववनिता देवानपिकुलेशानितरशायेन्नात्रसंशयः राजी
लवनहोमेनस्त्रिमाकर्षयेद्ध्रुवं विविधानेनदेवेशि सौभाग्यमतुलंभवेत् पीत
द्रव्यैर्हरिद्राद्यैः समित्यत्रफलार्णवैः गरुधूमविताङ्गारत्रिकट्वाग्निविषांजनं
उन्मत्तरससंसिक्तंपिष्टासम्यक्क्रमसेवितैः साध्यपादरजोभिश्चचिताभस्मस राम०
मन्वितैः साध्यमतिकृतिंकुर्यादेकांन सत्रहसजा सम्यक्प्रतिष्ठिप्राणांकुंडस्यो ३२

परिलंबयेत् स्वेनेन्मूत्रतिमांमंत्रीकुंडस्याधोयथाविधि मलीमसेनमनसा उग्र
दृष्टिरमर्षणाः चितानलेविषतरून्मत्तकाष्टसमेधिते तद्दुव्यैर्जुहुयाद्देवि विधि
वन्मंत्रवित्तमः कुर्याद्विद्वेषणोच्चाटमारणानितसंशयः शांतिकेसात्विकेदेवि
श्वेतवर्णंविचिंतयेत् वश्येतुराजसंदेविरक्तवर्णंविचिंतयेत् आतारस्तांपुरा
कृत्वापश्चात्कर्माणिसाधयेत् तामसंतमसंदेविकृष्णवर्णंविचिंतयेत् योन्य
थाकुरुतेमोहात्सभवेद्देवतापशुः तस्माद्देव्यामथन्यासंकारयेत्तुवलिंसुधीः
कृत्वाकर्माणिकुर्वीतनान्यथावीरवंदिते लिखेत्त्रिकोणंषट्कोणमष्टारंचमही
पुरं मूलमंत्रंलिखेन्मध्येसाध्यनामसमन्वितं षट्कोणेषुषडंगानिविलिखेत्पर
मेश्वरि केशरेषुस्वरानष्टौवर्गान्यत्रेषुपार्वति भूगेहेषुचतुष्कोणेष्वालिखेन्मू

उ० म्ना० लमंविके पंचवर्णैरजोभिस्तच्छुभंदृष्टिमनोहरं एवंयंत्रंसमालिख्यविधिवन्मंत्र
३३ वित्तमः एकत्रिषट्दशचतुःकलशांस्थापयेत्प्रिये मध्यादिचतुरस्रांतंद्वाविंशतिघटा
न्क्रमात् अथवाअष्टदलेदलेदेविदशवासमवाप्रिये चतुरोवाप्यथैकंवाकु
33 र्यात्साधकशक्तितः अस्थिरत्नंशिरातंतुर्मेदोमांसंरुधिरंजलं चर्मवस्त्रंशिखा
चैनालिकेरफलंशिरः मंत्रप्राणसमायुक्तंजपेत्कलशदेवतां सांवत्रिमूर्त्तिरंशा
तिमातरोभैरवान्विताः विदिक्षुगुरुविघ्नेशदुर्गाक्षेत्रपतीन्प्रिये कलशेषुसम
भ्यर्च्यविधिवन्मंत्रवित्तमः अभिषिंचेत्प्रियंशिष्यंसर्वपापप्रशांतये आयुः
श्रीकांतिसौभाग्यविद्यारोग्यादिकंभवेत् राज्याभिषिक्तोलभतेचतुःसागरगां राम०
महीं अकिंचनोभिषिक्तस्तुमहदैश्वर्यमाप्नुयात् वंध्याभिषिक्तालभतेपुत्र ३३

सर्वगुणान्वितं भूतापमृत्युरोगाद्याविनश्यंतिनसंशयः त्रिलोहेवापिभूर्जेवा
लिखित्वायंत्रमुत्तमं विधृतंबाहुनादेविसर्वेरक्षाकरंभवेत् आयुरारोग्यमैश्व
र्यविद्यालाभयशोजयं पराप्रासादमंत्रज्ञेदृश्यंतेनात्रसंशयः बहुनात्रकिमुक्ते
नत्रिषुलोकेषुमंत्रिणः अनेनमंत्रराजेननासाध्यंविद्यतेक्वचित् उर्द्धाम्नायेक
निस्नातः पराप्रासादमंत्रवित् कुलार्णवार्थतत्वज्ञोजीवन्मुक्तःकुलेश्वरि सुती
र्थेवाप्यतीर्थेवाजनमध्येपिवावसन् पराप्रासादमंत्रज्ञोमुक्तएवनसंशयः
आगमोक्तेनविधिनाक्रमपूजापरःसरं श्रीप्रासादपराबीजमष्टोत्तरशतंजपे
त् मुच्यतेब्रह्महत्यादिमहापापैश्चपंचभिः द्विशतंयोजपेद्देविश्रीप्रासादपरा
मनुं चतुरासीतिलक्षांगधारणाचरितैरपि अयोतिजांगचरितैरसंख्यांःज

उ० म्ना० ननार्जितैः वाड्केयौवनेवाल्येजायत्स्वमसुषुप्तिषु कर्मणामनसावाचज्ञानाज्ञा
३४ नकृतैरपि महापातकसंघैश्चाप्युपपातकराशिभिः मुच्यतेनात्रसंदेहः सत्यमे
तद्वरानने त्रिशतंयोजपेद्देवि श्रीप्रासादपरामनुं सर्वक्रतुषुयत्पुण्यंसर्वदा
नेषुयत्फलं सर्वव्रतेषुयत्पुण्यंसर्वतीर्थेषुयत्फलं तत्फलंलभतेदेविनात्रका
34 र्याविचारणा चतुःशतंजपेद्यस्तुश्रीप्रासादपरामनुं सदातस्यगृहेद्वारमणि
माद्यष्टसिद्धयः सेवंतेनात्रसंदेहः सर्वसिद्धिसमन्वितः यद्यन्मनोभिलषितंत
न्नत्तत्प्राप्नोतिनसंशयं धर्मार्थकाममोक्षाश्चसाक्षात्तस्यकरेस्थिताः सालोक्य
प्रमुखांदेविलभतेमुक्तिंचतुर्विधां जपेत्पंचशतंयस्तुश्रीप्रासादपरामनुं त एम०
त्फलंनैवसक्नोमिकथितंकुलनायिके तस्मात्सर्वप्रयत्नेनसर्वावस्थासुसर्व ३४

ॐ० म्मा० दा श्रीप्रासादपरामंत्रंप्रजपेद्भुक्तिमुक्तये॥ ॥

३५

35

पत्र ३५

अध्यात्मपुराण

श्लो ६५० उड्डामरतन्त्र